क्रं. ३२ संस्कृत वेदांत 2472

अवधूत गीता

४६४/3

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

# श्रीअवधूतगीताप्रारंभः श्रीदत्त ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

अ.गी. श्रीगणेशायनमः॥श्रीगुरूदत्तमंगलमूर्तयेनमः॥हरिःॐ ईश्वरा अ.१॥
॥१॥ नुग्रहादेवपुंसामद्वैतवासना॥महाभयपरित्राणाद्विप्राणामुपजा
यते॥१॥कश्चिद्योगीकश्चिद्भोगीकश्चिल्लग्नःपिशाचवत्॥दत्तात्रे
योहरिःसाक्षान्नान्यःपरतरंक्वचित्॥२॥येनेदंपूरितंविश्वंआ
त्मनैवात्मनात्मनि॥निराकारंकथंवंदेह्यभिन्नंशिवमव्ययं॥३॥
पंचभूतात्मकंविश्वंमरीचिजलसन्निभं॥कस्याप्यहोनमस्का
रंमहमेकोनिरंजनः॥४॥वेदांतसारसर्वस्वंज्ञानविज्ञानमेव ॥१॥
च॥ अहमात्मानिराकारःसर्वव्यापिस्वभावतः॥५॥आत्मैवके

The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

(2A)

वलंसर्वंभेदाभेदोनविद्यते॥अस्तिनास्तिकथंब्रूयाद्विस्मयः
प्रतिभातिमे॥६॥योवैसर्वात्मकोदेवोनिष्कंपोगगनोपमः॥स्व
भावनिर्मलःशुद्धःसएवाहंनसंशयः॥७॥अहमेवोव्ययोनं
तःशुद्धविज्ञानविग्रहः॥सुखंदुःखंनजानामिकथंकस्यापिव
र्तते॥८॥नमानसंकर्मशुभाशुभंमेनवाचिकंकर्मशुभाशुभंमे
नकायिकंकर्मशुभाशुभंमेज्ञानामृतंशुद्धमतींद्रियोहं॥९॥मनो
वैपरमात्मेवमनोवैविश्वतोमुखं॥मनोवैगगनाकारंनमनःपर
मार्थतः॥१०॥मनसोहिलयेजातेकथंकस्यापिवर्तते॥नहिसर्वम

(3)

अ॰गी॰ सर्वंचह्यात्मावैकेवलंयतः॥३१॥अहमेकमिदंसर्वंव्योमाका अ॰१॥
॥२॥ रंनिरंतरं॥पश्यामिकथमात्मानंप्रत्यक्षंवातिरोहितं॥३२॥
त्वमेवसर्वंहिकथंनबुध्यसेसमंहिसर्वेष्वविशिष्टमव्ययं॥स
दोदितोसित्वमखंडितःप्रभोदिवाचनक्तंचकथंस्वबुध्यसे॥३३॥
आत्मानंसततंविद्धिसर्वमेकंनिरंतरं॥अहंध्यातापरंध्येय
मखंडंखंड्यतेकथं॥३४॥नजातोसिमृतोसित्वंनतेदेहःकथं
चन॥सर्वंब्रह्मेतिविख्यातंब्रवीतिबहुधाश्रुतिः॥३५॥सबा ॥२॥
ह्याभ्यंतरोसित्वंशिवःसर्वत्रसर्वदा॥इतस्ततःकथंभ्रांतोप्र

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

धावसिपिशाच्चवत्॥१६॥संयोगश्चवियोगश्चवर्त्ततेनाहिते
नमे॥नत्वंनाहंजगन्नेतिसर्वमात्मैवकेवलं॥१७॥शब्दादिपं
चकस्यास्यनैवास्तित्वंनतेपुनः॥त्वमेवपरमंतत्त्वमतःकिंप
रितप्यसे॥१८॥जन्ममृत्युनतेचित्तंबंधमोक्षौशुभाशुभे॥क
थंरोदिषिरेवत्सनामरूपंनतेनमे॥१९॥अहोचित्तंकथंभ्रां
तंप्रधावसिपिशाच्चवत्॥अभिन्नपश्यचात्मानंरागात्त्यागा
त्सुखीभव॥२०॥त्वमेवतत्त्वंहिविकारवर्जितंनिष्कंपमेकंहि
विमोक्षविग्रहं॥नतेचरागोह्यथवाविकारःकथांहिसंतप्यसि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५)

अ॰गी॰ ॥२॥

रकामकामतः॥२१॥वदंतिश्रुतयःसर्वानिर्गुणंशुध्धमव्ययं॥ अ॰ १॥
अशरीरंसमंतत्वंतन्मांविध्धिनसंशयः॥२२॥साकारमनृ
तंविध्धिनिराकारंनिरंतरं॥एतत्तत्वोपदेशेननपुनर्भवसं
भवः॥२३॥एकानेकंसमंतत्वंवदंतिहिविपश्चितः॥रागात्या
गात्पुनश्चित्तमेकानेकंनाविद्यते॥२४॥अनात्मरूपंहिकथं
समाधिरात्मःस्वरूपंहिकथंसमाधिः॥अस्तीतिनास्तीति
कथंसमाधिर्मोक्षःस्वरूपंयदिसर्वमेकं॥२५॥विशुध्धोसि ॥२॥
समंतत्वंविदेहस्त्वमजोव्ययः॥जानाम्यहंनजानामिह्यात्मा

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

नं मन्यसे कथं ॥ २६ ॥ तत्वमस्यादिवाक्येभ्य आत्माहि प्रति
पादितः ॥ नेति नेति श्रुतिर्ब्रूयात् पंचभूतात्मकं ध्रुवं ॥ २७ ॥ आ
त्मन्येवात्मनासर्वंत्वया पूर्णं निरंतरं ॥ ध्याता ध्यानं न ते चित्तं
निर्लक्ष्यं ध्यायते कथं ॥ २८ ॥ शिवं विजानामि कथं वदामि शि
वं विजानामि कथं वदामि ॥ अहं शिवो वै परमार्थतत्वं स्वस्थः
स्वभावो गगनोपमोहं ॥ २९ ॥ न तत्वन्नाहं समं तत्वं कल्पना
हेतुवर्जितं ॥ ग्राह्यग्राह्यकनिर्मुक्तं स्वसंवेद्यं कथं भवेत् ॥ ३० ॥
अतत्वरूपं नहि वस्तु किंचित् तत्वस्वरूपं नहि वस्तु किंचित् ॥

(5)

अ·गी· आत्मैकरूपंपरमार्थकिंतत्वंनहिंसकःकोपिनवापिहिंस्यः अ· १॥
॥ ४ ॥ ॥२१॥विशुध्धोहंसमंतत्वंविदेहंविश्वतोमुखं॥विभ्रमःकथ
मात्मानंविभ्रांतोहंकथंपुनः॥२२॥घटेभिन्नेघटाकाशंरवलि
नंभेदवर्जितं॥शिवेनमन[illegible]भेदःप्रतिभातिमे॥२३॥
नघटोनघटाकाशोनजीवोजीवविग्रहः॥केवलंब्रह्मसंवि
ध्धीवेद्यवेदकवर्जितं॥२४॥सर्वत्रसर्वदासर्वमात्मानंसह
जंध्रुवं॥सर्वंशून्यमशून्यंचतन्मांविध्धिनसंशयः॥२५॥वेदा ॥४॥
नलोकानसुरानयक्षावर्णाश्रमोनैवकुलंन जातिः॥नधूम्र

(5A)

मार्गोनचदीप्तिमार्गो ब्रह्मैकरूपंपरमार्थतत्वं॥२६॥व्याप्य
व्यापकनिर्मुक्तंतत्वमेकंनिरंतरं॥प्रत्यक्षंवापरोक्षंवाआत्मानं
मन्यसेकथं॥२७॥अद्वैतंकेचिदिच्छंतिद्वैतमिच्छंतिचापरे॥
समंतत्वंनविंदंतिद्वैताद्वैतविवर्जितं॥२८॥श्वेतादिवर्णरहि
तंशब्दादिगुणवर्जितं॥कथयामिकथंतत्वंमनोवाचामगो
चरं॥२९॥यदाहिमन्यसेसर्वंदेहादिगगनोपमं॥तदाहि
ब्रह्मसंवेत्तिनतेद्वैतंपरापरं॥४०॥परेणसर्वमात्मानमभि
न्नंप्रतिभातिमे॥व्योमाकारंतथैकंचध्याताध्यानंकथंभ

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अ.गी. वेत्तु॥४१॥यत्करोमियदश्नामियज्जुहोमिददामियत्॥ अ.१॥
॥५॥ एतत्सर्वंनमेकिंचिद्विद्धिशुद्धोमहजोव्ययः॥४२॥सर्वंजगद्वि
द्धिनिराकृतीदंसर्वंजगद्विद्धिविकारहीनं॥सर्वंजगद्विद्धिविशुद्ध-
सर्वंजगद्वि द्धिशिवैकरूपं॥४३॥तत्वंत्वंहनसंदेहकिन्नजानासिभो देहं
पुनः॥असंवेद्यंस्वसंवेद्यमात्मानंनन्यसेकथं॥४४॥षडं
गयोगान्नतुनैवबुध्धंगुरूपदेशान्नतुनैवबुध्धं॥मनोवि
नाशंनतुनैवबुध्धंस्वयंचतत्वंस्वयमेवबुध्धं॥४५॥नहिभू ॥५॥
तात्मकोदेहोविदेहोवर्ततेनहि॥आत्मैवकेवलंसर्वंतुर्या

(6A)

तीतंकथंत्रयं॥४६॥मायातीतंकथंवेत्तिमायास्थानं
नविद्यते॥तत्वमेकमिदंसर्वंव्योमाकारंनिरंतरं॥४७॥
आदिमध्यांतमुक्तोहंनबंधोहंकदाचन॥स्वभाव
निर्मलःशुध्धःइतिमेनिश्चलामतिः॥४८॥महदा
दिजगत्सर्वंनाकिंचित्प्रतिभातिमे॥ आत्मैवकेव
लंसर्वंकथंवर्णाश्रमस्थितिः॥४९॥नाहंमनुष्यो
नचदेवयक्षोनब्राह्मणक्षत्रियवैश्यशूद्रः॥न

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(७)

अ.गी. ब्रह्मचारीनगृहीवनस्थोभिक्षुर्नचाहंनिजबोधरूपः ॥ ॥ अ. ३ ॥

॥ ६ ॥ ॥५०॥ जानामिसर्वदासर्वमहमेकंनिरंतरं ॥ निरालंबम

शून्यंचशून्यंव्योमादिपंचकं ॥ ५१ ॥ नपुंसकःपुमांस्त्री

ननबंधोनैवकल्पना ॥ सानंदंवानिरानंदमात्मानंम

न्यसेकथं ॥ ५२ ॥ नबंधोनचमुक्तोहंनचाहंब्रह्मणःपृ

थक् ॥ नकर्तानचभोक्ताचव्याप्यव्यापकवर्जितः ॥ ५३ ॥ ॥ ६ ॥

यथाजलेजलन्यस्तंसलीनंभेदवर्जितं ॥ प्रकृतेःपुरु

(7A)

षस्तद्वद्भेदः प्रतिभातिमे ॥५४॥ जानामितेपरंरूपंप्र
त्यक्षंगगनोपमं ॥ यच्चापरंहितेरूपंमरीचिजलसन्निभं
॥५५॥ नोगुरुर्नोपदेशश्चनचोपाधिर्नचक्रिया ॥ विदेहंमां
विजानीहिविशुद्धोहंस्वभावतः ॥५६॥ विशुद्धोसिपरोसि
त्वंनतेचित्तंकदाचन ॥ अहंत्वात्मापरंतत्वमितिवक्तुंनस
ज्जते ॥५७॥ यदियोगेनयुक्तोसिनबद्धोसिकदाचन ॥
अहमात्मापरंतत्वमितिवक्तुंनसज्जसे ॥५८॥ किंवारो

द्विधिरेचित्तआत्मन्येवात्मनाभव॥पिबवत्सकलातीतंमद्वै
तंपरमामृतं॥५९॥नैवबंधोनचाबंधोनबोधोबोधएवच॥
यस्यनिर्वासनोबोधःसबोधोनान्यथाभवेत्॥६०॥ध्यानंन
तर्कोनसमाधियोगोनदेशकालौनगुरूपदेशः॥स्वभावसं
वित्तिरहंचतत्वमाकाशकल्पंसहजंध्रुवंच॥६१॥नाहंजातो
मृतोवापिनमेकर्मशुभाशुभे॥शुद्धोहंनिर्गुणंब्रह्मबंधमु ॥७॥
क्तिकथंमम॥६२॥यदिसर्वगतोदेवःस्थिरःपूर्णोनिरंतरः

Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. " Joint project of the

(8A)

अंतरंनैवपश्यामिसबाह्याभ्यंतरंकथं ॥ ६३ ॥ स्फुरत्येकंज
गत्सर्वंमखंडितनिरंतरं ॥ अहोमायामयोमोह अद्वैतेद्वैत
कल्पना ॥ ६४ ॥ साकारंचनिराकारंनेतिनेतीनेतीतिसर्व
दा ॥ भेदाभेदविनिर्मुक्तोवर्ततेकेवलःशिवः ॥ ६५ ॥ नतेच
माताचपितानबंधुर्नतेचपत्नीनचशत्रुमित्रं ॥ नपक्षपा
तोनविपक्षपातः कथंहिसंतप्तमिदंचचित्तं ॥ ६६ ॥ दिवा
नक्तंनतेचित्तमुदयास्तमयोनहि ॥ विदेहस्यशरीरत्वंक

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अ.गी. स्मयंतिकथंबुधाः॥६७॥नभिन्नंचाविभिन्नंचनहिदुः अ.१॥
॥८॥ खसुखादिच॥नहिसर्वमसर्वंचविद्धिचात्मानमव्य
यं॥६८॥नाहंकर्तानभोक्ताचनमेकर्मपुराधुना॥नमे
देहोविदेहोवानिर्ममोतिममेतिकिं॥६९॥नमेरागा
दिकादोषादुःखंदेहादिकंनहि॥आत्मानंविद्धिमा
मेकंविशालंगगनोपमं॥७०॥सखेमनःकिंबहुज ॥८॥
ल्पितेनसखेमनःसर्वमिदंवितथ्यं॥यत्सारभूतंक

(9A)

थितंमयातेत्वमेवतत्वंगगनस्वरूपं॥७१॥येनकेना
पिभावेनयत्रकुत्रमृताःपुनः॥योगिनस्तत्रलीं
यंतेघटाकाशमिवांबरे॥७२॥धर्मार्थकाममो
क्षंचकियदादिचराचरं॥मन्यतेयोगिनःसर्वं
मरीचिजलसंनिभं॥७३॥अतीतानागतंक
र्मवर्तमानंतथैवच॥नकरोमिनभुंजामिइतिमेनिश्चिता
मतिः॥७४॥तीर्थेचांडालगेहेवायदिवानष्टचेतनः॥परि
त्यजन्देहमिमंज्ञानादेवविमुच्यते॥७५॥शून्यागारेस

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project

(10)

अ·गी· मरसपूतस्तिष्ठत्येकः सुखमवधूतः॥ विचरतिनग्नःस्त्य अ·३॥
॥९॥ क्त्वागर्वंविंदतिकेवलमात्मनीसर्वं॥७६॥ तुर्यातुर्यंन
हिनाहियत्रविंदतिकेवलमात्मानितत्र॥ धर्माधर्मौनहिन
हियत्रबद्धोमोक्षःकथामहतत्र॥७७॥ विंदतिविंदतिन
हिनहिमंत्रंछंदोलक्षणंनहिनहितंत्रं॥ समरससमग्नोभा
वितपूतःप्रलपितमेतत्सुखमवधूतः॥७८॥ सर्वशून्यमशू
न्यंचसत्यासत्यंनविद्यते॥ स्वभावभावितंब्रूयाच्छास्त्रसंवि ॥९॥
त्तिपूर्वकं॥७९॥ ॐतत्सदितिश्रीमदवधूतगीतायांस्वात्मसं
वित्तिपूर्वकमित्युपदेशोनामप्रथमोध्यायः॥३॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(1)

॥श्रीअवधूतगी[illegible]ीयेध्यायप्रारंभ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com